वरं वरय भद्रं ते यत्ते मनसि काङ्क्षितम् ॥४२॥

भगवान् पिण्डेश्वर शिव कहते हैं—

हे द्विजश्रेष्ठ ! व्रत-निष्ठा संपन्न तुम्हारी तपस्या से मैं सन्तुष्ट हूँ । हे भक्त ! वर मागो ! तुम्हारे मन में जो अभिलाषा है उसे माँगो ! मैं तुम्हें दूँगा ! तुम्हारा कल्याण हो !

इति श्रुत्वा वचस्तस्य देवदेवस्य शूलिनः ।
प्रत्युवाच महादेवं प्रहृष्टो ब्राह्मणोत्तमः ॥४३॥

देवदेव शूलपाणि महादेव की इस तरह की वाणी सुन अत्यन्त आनन्दित वे ब्राह्मण श्रेष्ठ भगवान् पिण्डेश्वर शिव के प्रति प्रत्युत्तर निवेदन करने लगे ।

विष्णुमित्र उवाच

धन्योऽस्ति कृतकृत्योऽस्मि कृतार्थोऽस्मि जगत्पते ! ।
त्वद्दर्शनेन पिण्डेश ! दुर्लभेन दुरात्मनाम् ॥४४॥
किं वृणे ? त्वां महादेव ! भुक्तिमुक्तिफलप्रदम् ।
त्वत्पादकमले मेऽस्तु भक्तिरव्यभिचारिणी ॥४५॥

यत्रकुत्र ! स्थितस्यापि त्वन्माया-मूढचेतसः ।
त्वत्पादाम्बुरुहे शम्भो ! भक्तिमेव प्रयच्छ मे ॥४६॥

विष्णुमित्र कहते हैं--

हे जगत्पति ! आज मैं धन्य हो गया हूँ, कृत्यकृत्य हूँ और कृतार्थ हूँ। इस दुरात्मा को आपका दुर्लभ दर्शन मिल गया है। हे पिण्डेश्वर शिव ! हे महादेव ! आपसे मैं क्या माँगूँ ? जब कि मुक्ति और भुक्ति देनेवाले आप मेरे ही सामने में प्रत्यक्ष हैं। हे प्रभो ! मैं आप से सिर्फ इतना ही मागता हूँ, आपके चरण कमलों में अव्यभिचारिणी मेरी भक्ति बनी रहे। हे भगवन् ! आपकी माया से विमोहित मूढ़ चित्तवृत्ति वाला होता हुआ भी मैं जहाँ कहीं भी रहूँ, जिस योनि में भी पहुँचूँ, हे शम्भो ! बस आप इतना ही कृपा करें कि आपके चरण कमलों की भक्ति मात्र मुझे प्राप्त हो।

इति श्रुत्वा वचस्तस्य द्विजस्य त्रिपुरान्तकः ।
पिण्डेश्वरः प्रसन्नात्मा तमुवाच तथास्त्विति ॥४७॥

वे द्विज के इस तरह की वाणी को सुनकर त्रिपुरान्तक भगवान् पिण्डेश्वर शिव ने भी अति प्रसन्न होकर उन्हें, 'तथास्तु' तुमने जैसा कहा वैसा ही होगा, जो तुम्हारी इच्छा है वही होगी, ऐसा कहा !

शिवः पिण्डेश्वर उवाच

यत्र कुत्र स्थितो वाऽपि मद्भक्तस्त्वं भविष्यसि ।
देहान्ते मम सायुज्यं लप्स्यसे नात्र संशयः ॥४८॥

भगवान् पिण्डेश्वर शिव कहते हैं—

हे द्विजश्रेष्ठ ! आप जहाँ भी, जिस योनि में भी जिस हालत में भी रहेंगे, मेरे ही भक्त होकर रहेंगे। देहान्त में मेरी सायुज्य मुक्ति आपको मिलेगी, इसमें सन्देह नहीं है।

इत्युक्त्वा तं महादेवः पुरत्रयविदारणः ।
पश्यतस्तस्य विप्रस्य तत्रैवान्तरधीयत ॥४९॥

इस तरह से उन द्विजश्रेष्ठ विष्णुमित्र को कहकर त्रिपुरान्तक महादेव भी उन द्विजश्रेष्ठ के द्वारा देखते-देखते ही वहीं पर अन्तर्धान हो गए।

तस्मिन्नन्तर्हिते देवे पिण्डेशे त्रिपुरान्तके।
अवाप्य तपसः सिद्धिं प्रहृष्टोऽभूद् द्विजोत्तमः ॥५०॥

भगवान् त्रिपुरान्तक देव पिण्डेश्वर शिव के अन्तर्धान हो जाने पर अपनी तपस्या की सिद्धि प्राप्त हो गई है, ऐसा समझकर वे द्विजोत्तम भी अत्यन्त खुश हुए।

किञ्चित्कालं स्थितस्तत्र पिण्डेश्वर-समीपतः।
ततस्तस्माद्विनिष्क्रम्य गङ्गासागरसङ्गमम् ॥५१॥
संप्राप्य स द्विजस्तत्र स्नात्वा सन्तर्प्य देवताः।
त्रिरात्रमुसितस्तस्माज्जगन्नाथमुपागतः ॥५२॥

इसके बाद, वे द्विज भी पिण्डेश्वर समीप कुछ दिन तक रहकर रुद्राक्षारण्य विजयपुर से प्रस्थान कर गंगासागर पहुँचे। गंगासागर पहुँचकर वहाँ स्नानादि नित्य कृत्य करके पितृयों को तर्पण पिंड और देवता को पूजा आराधना से तृप्त कर तीन रात वहाँ रहकर वहाँ से भी प्रस्थान कर जगन्नाथ पहुँचे।

तं दृष्ट्वा देवदेवेशं सत्यमूर्तिधरं हरिम्।
प्रहृष्टो न्यवसत्तत्र किञ्चित्कालं द्विजोत्तमः ॥५३॥

सत्यमूर्तिधर हरि भगवान् जगन्नाथ का दर्शन करके अत्यन्त आनन्दित वे ब्राह्मण कुछ दिन तक वहीं रहकर—

ततो गोदावरीं प्राप्य स्नात्वा तत्र यथाविधि।
सन्तर्प्य च पितॄन्देवान् न्यवसत्सप्तरात्रकम् ॥५४॥

गोदावरी पहुँचे। गोदावरी पहुँचकर यथाविधि गोदावरी में स्नानकर देवता और पितृयों को सन्तुष्ट कर, वहाँ (गोदावरी के तट पर) भी सात रात रहे।

ततः श्रीशैलमासाद्य दृष्ट्वा श्रीमल्लिकार्जुनम्।
भ्रमराम्बासमायुक्तं कृष्णावेणीतटे स्थितम् ॥५५॥

गोदावरी से प्रस्थान कर श्रीशैल में पहुँचे, श्रीशैल में पहुँचकर मल्लिकार्जुन का भ्रमराम्बा से सहित कृष्णा वेणी के तट में दर्शन कर—

ततः सह्याचलं दृष्ट्वा महानन्दिमुपागतः ।
वेङ्कटाद्रिं समासाद्य तत्र वेङ्कटनायकम् ॥५६॥
ददर्श कमलाकान्तं हरिं पुष्करिणीतटे ।
वसन्तं देवदेवेशं सर्वकामफलप्रदम् ॥५७॥

वहाँ से सह्याचल का दर्शन करते हुए महानन्दी पहुँचे, महामन्दी से वेङ्कटाचल पहुँचे, वहाँ वेङ्कटेश्वर का दर्शन करके पुष्कर क्षेत्र में पुष्करणी के तट में विराजमान, देवता के भी देवता, संपूर्ण कामनाओं के फल देने वाले, लक्ष्मी के पति भगवान् विष्णु का दर्शन किया ।

ततः काञ्चीपुरीं प्राप्य कामाक्षीं कामदापिनीम् ।
एकाम्रनाथं देवेशं सर्वतीर्थसमीपगम् ॥५८॥
विलोक्य परमं हृष्टस्त्रिरात्रमुषितस्तदा ।
गत्वा वरदराजस्य मन्दिरञ्च ददर्श सः ॥५९॥
ततश्चिदम्बरं क्षेत्रं सम्प्राप्य द्विजसत्तम ।
दृष्ट्वा सभापतिं देवं तत्रैव न्यवसत् सुखम् ॥६०॥

पुष्कर से काञ्चीपुरी पहुँचे । काञ्ची पहुँचकर कामनाओं को प्रदान करने वाली भगवती कामाक्षी का दर्शन करके, सर्वतीर्थ के समीप में स्थित देवेश एकाम्रनाथ का दर्शन कर अति प्रसन्न वे द्विज तीन रात तक वहाँ रहकर, वहाँ से वरदराज के मन्दिर में पहुँचकर उन ब्राह्मण ने वरदराज का दर्शन किया । उसके बाद वे द्विजसत्तम चिदम्बर क्षेत्र में पहुँचे, वहाँ पहुँचकर भगवान् सभापतिका दर्शन करके वहीं कहीं सुखपूर्वक विराजने लगे ।

ततः कालेन महता दिष्टान्तं प्राप्य स द्विजः ।
शिवदूतैः समानीतः शिवसायुज्यमाप्तवान् ॥६१॥

चिदम्बर क्षेत्र में रहते हुए, बहुत दिनों के बाद वे द्विज (विष्णुमित्र) ने पाञ्चभौतिक देह त्याग कर दिया । उसके बाद शिवदूतों ने उन्हें शिव सन्निधि में पहुँचाया और उन्हें भगवान् शिव की सायुज्य मुक्ति (निर्वाण) प्राप्त हुआ ।

एवं प्रभावः पिण्डेशो नृणां क्षिप्रप्रसादकृत् ।
तस्मादवश्यं द्रष्टव्यः श्रेयस्कामैः शरीरिभिः ॥६२॥

यदृच्छया सकृद्वाऽपि जन्ममध्ये शरीरिणः।
येन पिण्डेश्वरो दृष्टः स मुक्तो नात्र संशयः ॥६३॥

हे देवी ! हे ऋषीश्वरों ! भक्तों के प्रति अतिशीघ्र प्रसन्न होने वाले भगवान् पिण्डेश्वर शिव हैं। अतएव कल्याण चाहने वाले मनुष्यों के द्वारा जीवन में एक बार अवश्य दर्शन योग्य भगवान् पिण्डेश्वर शिव हैं। बिना जाने बूझे भी अनायास मात्र एक बार यदि किसी के जीवन में भगवान् पिण्डेश्वर का दर्शन हो जाय तो भी वह व्यक्ति मुक्त हो जाता है, इस तथ्य में संशय नहीं है।

इति श्रीस्कन्दपुराणे हिमाद्रिखण्डे पूर्वभागे रुद्राक्षारण्य-
माहात्म्ये लक्ष्मीललितटीकायां पिण्डेश्वर
माहात्म्यवर्णनं नाम चतुर्दशोऽध्यायः ॥१४॥

अथ पञ्चदशोऽध्यायः

शिव उवाच

अथाऽन्यत्कथयिष्यामि पिण्डेशस्य पुरद्विषः।
माहात्म्यं देवदेवस्य शृणुष्वावहिता प्रिये ! ॥१॥

भगवान् शिव कहते हैं।

हे प्रिये ! तुम्हारे प्रश्नों के क्रम से त्रिपुरहर देवदेव भगवान् पिण्डेश्वर का माहात्म्य मैं और आगे सुनाता हूँ। हे देवी ! सावधान होकर तुम सुनो !

पुरा स्वयम्भूर्भगवान् सृष्टिकाल उपागते।
न किञ्चित् ज्ञातवान् लोकान् स्रष्टुं मायाविमोहितः ॥२॥

पहले (प्रथम) सृष्टि समय उपस्थित होने पर 'किस तरह से सृष्टि की जाय' भगवान् ब्रह्मा जी को कुछ भी उपाय नहीं सूझा, ब्रह्मा जी माया से विमोहित थे, माया से सवलित विग्रह थे।

स विचार्य तदा देवः शीतशैलमुपागतः।
पिण्डेश्वरं समुद्दिश्य तपस्तेपे सुदारुणम् ॥३॥
स्तोत्रमेतत् पठन्नित्यं दिव्यं वर्षशतं प्रभोः।
जितेन्द्रियो जितप्राणो जितात्मा दृढनिश्चयः ॥४॥

तब ब्रह्मा जी ने सोचा तपस्या करनी चाहिए, तपस्या के विचार में ब्रह्मा जी हिमालय पर्वत शीत शैल विजयपुर पधारे, विजयपुर पहुँचकर भगवान् पिण्डेश्वर की तपस्या की, तपस्या कष्टतर थी। अनुष्ठित तप में वे इस स्तोत्र को नित्य पाठ करते थे, इसी दिनचर्या में ब्रह्मा जी के दिव्य हजार वर्ष व्यतित हुए। ब्रह्मा जी ने जितेन्द्रिय होकर जितप्राण होकर (प्राणवायु को जीतकर) जितात्मा होकर दृढ़ निश्चय को लेकर तप किया।

ब्रह्मोवाच

ये पित्रादिसुहृद्गणाः शुभगुणाः स्नेहारुणास्तेषु मां
त्रातुं कोपि नहि प्रभुः पशुपते ! भीतं भवाम्भोनिधेः
हालाहालगराशन ! त्रिनयन ! स्वानन्दसम्पद्घन !
श्रीपिण्डेश्वर ! शीतशैलग ! महादेव ! प्रसीद प्रभो ! ॥५॥

चतुर्मुख ब्रह्मा जी शिव-स्तुति करते हैं—

हे शिव ! इस संसार समुद्र से भयभीत मुझे माता-पिता इष्ट मित्र स्नेही शुभचिन्तक कोई भी रक्षा नहीं कर सकते। यदि रक्षा करने के लिए समर्थ हैं तो वही जो संपूर्ण जीवात्माओं के पति हैं। एवं पशुपति हैं वही समर्थ हैं। हे हालाहल विषपान करने वाले ! भगवन् तीन नयन धारण करने वाले ! अतुलनीय स्वात्मानन्द संपत्ति के ईश्वर ! हिमालय पर्वत भाग विजयपुर रुद्राक्षारण्य में निवास करनेवाले ! महादेव ! ब्रह्माण्डपिण्ड के प्रतीक अमृतपिण्ड भगवान् पिण्डेश्वर हे मेरे प्रभु ! मेरे प्रति आप प्रसन्न हों

वीराराधित ! बोधसौधशिखरस्फूर्जन्महामण्डपे
वेतुण्डाननषाण्मुखप्रभृतिभिः साकं प्रभो ! खेलसे।
सीदन्तं व्यसनार्णवे निपतितं भीतं न मां विस्मर,
श्रीपिण्डेश्वर ! भक्तवत्सल ! महादेव प्रसीद ! प्रभो ! ॥६॥

हे ज्ञान-विज्ञान बल ऐश्वर्य में अग्रणी ! वीरों के द्वारा आराधित ! आप देदीप्यमान ज्ञान भवन के ऊपर महामंडप में विराजमान हो, सिद्धिविनायक गणेश और कार्तिकेय देव सेनापति बालकों के साथ क्रीडा करते हैं। व्यसन के समुद्र में डूबता हुआ, कष्टतर दशा को प्राप्त हुआ, अति भयभीत मुझें आप न भूलें। हिमालय पर्वत भाग विजयपुर में निवास करने वाले ! हे भक्तवत्सल ! हे अमृतपिण्ड पिण्डेश्वर ! हे ब्रह्माण्डपिण्ड के प्रतीक ! हे महादेव ! हे मेरे प्रभु ! मेरे प्रति आप प्रसन्न हों।

देव ! त्वं विधिरूपतस्त्रिभुवनं निर्माय, लीलावशात्
पासि श्रीपतिनामतस्तदखिलं शम्भो ! स्वसृष्टं पुनः।
संहर्तुं हरतामुपैषि वद मां त्रातुं कथं न प्रभुः ?
श्रीपिण्डेश्वर ! चन्द्रशेखर ! महादेव ! प्रसीद प्रभो ! ॥७॥

हे देव ! आप ब्रह्मा का रूप धारण करके अपनी लीला से उत्पन्न विश्व को, लक्ष्मीपति विष्णु का रूप धारण कर, पालन करते हैं। हे शम्भो ! अपनी ही सृष्टि और स्थिति को हर रूप धारण करके पुनः प्रलय में हरण करते हैं, तो बताइए ? क्या आप हमें रक्षा नहीं कर पाएँगे ? हे ब्रह्माण्ड पिण्ड के प्रतीक ! अमृतपिण्ड पिण्डेश्वर ! हे चन्द्रशेखर ! हे महादेव ! हे मेरे प्रभु ! आप मुझ में प्रसन्न हों।

क्षोणीतोयहुताशनानिलवियत्सूर्येन्दुहोत्रात्मभिः
विश्वातीत ! चिदात्मक ! त्रिभुवनं पुष्णासि मूर्त्यष्टकैः।
कष्टात्कष्टतरं दशामधिगते किं मय्युपेक्षातव,
श्रीपिण्डेश्वर ! दीनपोषण ! महादेव ! प्रसीद प्रभो ! ॥८॥

पृथिवी, पानी, अग्नि, वायु, आकाश, सूर्य, चन्द्र, होता, स्वरूप आठ प्रकार के शरीर धारण करने वाले हे अष्टमूर्तिधर हर ! आप स्वयं त्रिभुवन को ही शिवतत्व से पालन करते हैं, विश्व से परे हैं, चैतन्य आत्मा स्वरूप हैं, तो क्या अनेकों दुःखतर दशाओं को प्राप्त मुझे आपकी उपेक्षा उचित है ? हे ब्रह्माण्डपिण्ड के प्रतीक ! दीन दुखियों को पालन करने वाले, अमृतपिण्ड ! महादेव ! मेरे प्रभु ! आप मुझ में प्रसन्न हों।

चिद्वचोमामृतसिन्धुबन्धुरधरा धीरा विहारक्रिया-
दूरीभूत-दुरन्तसन्ततभवव्याल-प्रतापानलाः ।
त्वां ध्यायन्ति, कथं वयं जडधियो ध्यायेम कारुण्यतः
श्रीपिण्डेश्वर ! वीरवन्दित ! महादेव ! प्रसीद प्रभो ! ॥९॥

चैतन्य ब्रह्मस्वरूप ! आकाशगङ्गा के हिलोरों में गोता लेने में निपुण, अतएव अनिवार्य संसार सर्प दंशन से निकलने वाली विषज्वाला से दूर महापुरुष हीं आप को ध्यान में स्थिर कर पाते हैं, तो हे भगवान् ! मैं करुणा का पात्र, जडबुद्धि आपका ध्यान कैसे कर पाउगा ? हे ब्रह्माण्डपिण्ड के प्रतीक ! हे वीरवन्दितचरण ! हे अमृतपिण्ड-पिण्डेश्वर ! हे महादेव ! हे मेरे प्रभु ! आप मुझमें प्रसन्न हों ।

शम्भो ! ऽलंकरणानि निश्चितवतां श्रेयांसि भूयांस्यलम्
रागी तेङ्घ्रिमुपागतस्तव विभो ! सर्वार्थसिद्धिप्रदम् ।
वीराधीश्वरमेव कार्मुकधरं स्वामिन् ! वदान्याग्रणी !
श्रीपिण्डेश्वर ! पण्डितस्तुत ! महादेव ! प्रसीद प्रभो ! ॥१०॥

हे शंभो ! अनेकों लोकोपकार करके ख्याति प्राप्त (गंगा, चन्द्र, नाग नन्दी, गौरी, गणेश) आदि भी योग्य आश्रय को खेजते हुए एक मात्र आपको अनुरूप प्राप्त कर सेवक हो, सेवा कर रहे हैं । आप वीरों के वीर हैं, हिमालय पर्वत स्वरूप पीनाक धनुष धारण करते हैं । हे स्वामी ! हे दानियों में अग्रणी ! हे ब्रह्माण्डपिण्ड के प्रतीक ! हे अमृतपिण्ड-पिण्डेश्वर ! हे सदसद् विवेकशील बुद्धिमानों के द्वारा स्तुत्य ! हे महादेव ! है मेरे प्रभु ! आप मुझमें प्रसन्न हों ।

ऋक्षाध्यक्षवलक्षपक्षविशदत्र्यक्षाम्बुजाक्षार्चित !
प्रेक्षावत्परिरक्षणक्षम ! विभो ! दक्षाध्वरध्वंसन ! ।
वीक्षाक्षिप्तपुरत्रय ! स्मरहर ! क्षेमाब्धिचन्द्रोदय !
श्रीपिण्डेश्वर ! खण्डिताहित ! महादेव ! प्रसीद प्रभो ! ॥११॥

शुक्ल पक्ष के चन्द्र किरण के समान शुक्ल वर्ण हे त्रिनयन ! हे जगत्-पूज्य ! हे विभो ! आपकी दृष्टि मात्र भी जगत् रक्षा रकने में समर्थ हैं।

हे दक्षयज्ञ ध्वंसक ! त्रिपुर के पुरों को दृष्टि मात्र से ही जला देने वाले ! हे स्मरहर ! हे कल्याणचन्द्रोदय ! है ब्रह्माण्डपिण्ड के प्रतीक ! अहितों को (अत्रुओं को) नष्ट करने वाले ! हे अमृतपिण्ड पिण्डेश्वर शिव ! हे मेरे प्रभु ! आप मुझ में प्रसन्न हों ।

श्रीकान्तप्रमुखामरार्चित ! बुधस्वान्तारविन्दालय ! ।
भ्रान्तानामतिदूर ! वीर ! महतां सन्तानवत्सर्वद !
नादान्तः स्थित ! नाथ ! बोधितनिराबाधात्मबोधात्मक !
श्रीपिण्डेश्वर ! शांतशाश्वत ! महादेव ! प्रसीद प्रभो ! ॥१२॥

हे श्रीपति विष्णु प्रमुख देवताओं के द्वारा अर्चित चरण ! विद्वानों के हृदय कमलों में निवास करने वाले ! हे वीर ! आप भ्रान्त व्यक्तियों से अति दूर रहते हैं, और अभ्रान्त महान् व्यक्तियों के लिए सब कुछ देने वाले कल्प-वृक्ष के समान हैं । आप नादविन्दु ॐ: के ऊपर की विन्दु ं का आधार ु रेखा (आधार स्वरूप ॐ: रूप) नाद के अन्त्य में रहने वाले हैं । आप जगत् के नाथ हैं । निर्बाध वेधात्मक दर्शन ज्ञान के द्वारा आप बोधित होते हैं । हे ब्रह्माण्डपिण्ड के प्रतीक ! शान्तिदाता शान्त शिव ! हे अमृतपिण्ड पिण्डेश्वर महादेव ! हे मेरे प्रभु ! आप मुझ में प्रसन्न हों ।

सूत उवाच

इमं स्तवं पठन्नित्यं नियतेन्द्रियमानसः ।
चचार परमं तीव्रं तपः सर्वपितामहः ॥१३॥
तप्यमाने तपस्तस्मिन् साग्रं वर्षशतं विधौ ।
आविर्बभूव पिण्डेशस्तत्पुरः परमेश्वरः ॥१४॥

सूत जी कहते हैं ।--

हे ऋषीश्वरों ! इन्द्रियों को वश में रख कर उक्त स्तोत्र को नित्य पाठ करते हुए, तीव्र तपस्या में सभी के पितामह ब्रह्माजी ने पूरे दिव्य एक सौ वर्ष व्यतित किये, तब उनके सामने परमेश्वर अमृतपिण्ड पिण्डेश्वर शंकर भगवान् प्रकट हुए ।

तं दृष्ट्वा देवदेवेशं पिण्डेश्वरमनामयम् ।
आविर्भूतं स्वपुरतः परं हर्षमुपागतः ॥१५॥

प्रदक्षिणात्रयं कृत्वा ननाम भुवि दण्डवत् ।
प्रणम्य देवदेवेशमुत्थायानन्दनिर्भरः ॥१६॥

आनन्दाश्रुपरीताक्षो हर्षगद्गदया गिरा ।
पिण्डेश्वरं प्रभुं ब्रह्मा स्तोतुं समुपचक्रमे ॥१७॥

अपने सामने प्रकट हुए भवरोग वर्जित, ब्रह्माण्ड पिण्डके प्रतीक, अमृत-पिण्ड भगवान् पिण्डेश्वर शिव, देवदेवेश को देखकर, चतुर्मुख सृष्टिकर्ता ब्रह्मा जी अति हर्षित हुए। तीन परिक्रमा करके पृथिवी में झुक कर दण्डवत प्रणाम कर उठे और आनन्द अधिक होने से आनन्द के आशू बहाते हुए हर्ष से गद्गद वाणी में भगवान् पिण्डेश्वर की स्तुति करने लगे।

ब्रह्मोवाच

विश्वेश्वर ! विश्वात्मक ! पश्वादिषु सततसन्ततानन्त ! ।
निःश्वासनिर्मितागम ! पिण्डेश्वर ! पाहि चण्डिकारमण ! ॥१८॥

ब्रह्मा जी शङ्कर की स्तुति करते हैं--

हे विशेश्वर ! हे विश्व आत्मा स्वरूप ! विभिन्न विश्व के विभन्न जीवात्माओं के अन्तः करण में विराजमान ! हे अनन्त ! आप के निःश्वास से वेद प्रकट हुए हैं, हे चन्डिकारमण ! शक्ति के पति ! हे अमृतपिण्ड पिण्डेश्वर शिव ! मेरी रक्षा करें।

सीमातीतगुणार्णव ! सामादिकनिगमवेद्य ! निखिलाद्य ! ।
सोमाङ्कुराङ्क ! शङ्कर ! पिण्डेश्वर ! पाहि चण्डिकारमण ! ॥१९॥

हे असीमगुणसमुद्र ! हे सामादि वेदों के द्वारा वेद्य ! हे सम्पूर्ण जगत् के आदि ! हे चन्द्रमा को शरीर में (जटाजूट में) धारण करने वाले ! हे शंकर ! अमृतपिण्ड पिण्डेश्वर ! हे शक्ति (दुर्गा) के पति ! हे शिव ! मेरी रक्षा करें।

ताराधीश्वरसप्रभ ! हारायितभुजगराज ! रवितेज ! ।
माराहित ! वीरार्चित ! पिण्डेश्वर ! पाहि चण्डिकारमण ! ॥२०॥

हे चन्द्रतुल्य शीतल उजियारे ! नागराज को हारके स्थान में पहिरने वाले ! रवितुल्य तेजोमय ! कामदेव को जला देने वाले, वीरों के द्वारा वन्दित ! हे शक्ति के पति ! ब्रह्माण्डपिण्ड के प्रतीक ! अमृत पिण्ड पिण्डेश्वर ! मेरी रक्षा करें ।

बालारुणारुणजट ! लीलाधृतदिव्यदेह ! जितमोह ! ।
बालाम्बिकामनोहर ! पिण्डेश्वर ! पाहि चण्डिकारमण ! ॥२१॥

हे अरुणोदय की लालिमा से तुल्य लाल वर्ण के जटाओं को धारण करने वाले ! अगत्रक्षण लीला के लिए अनेकों अवतार धारण करने वाले ! हे माया मोह को जीतने वाले ! बाल अम्बिका (सती के देहपतन के बाद व्याही पार्वती) के लिए भी मनोहर ! स्थिर यौवन ! हे शक्ति के पति ! हे अमृतपिण्ड पिण्डेश्वर शिव ! मेरी रक्षा करें ।

विद्यामय ! हृद्याशय ! विद्यावैशद्यवेद्य ! निरवद्य ! ।
पञ्चानन ! वृषवाहन ! पिण्डेश्वर ! पाहि चण्डिकारमण ॥२२॥

हे विद्यामय ! हे घट-घट वासी ! विद्या के द्वारा परिस्कृत बुद्धिवालों के द्वारा वेद्य ! हे प्रशंशनीय गुण वाले ! हे पञ्चानन ! हे वृषवाहन ! हे शक्ति के पति ! हे अमृतपिण्ड पिण्डेश्वर शिव ! मेरी रक्षा करें ।

ज्ञानयोगघन ! शिव ! पञ्चाशद्वर्णरूप ! धुतपाप ! ।
पञ्चाक्षरान्तरचर ! पिण्डेश्वर ! पाहि चण्डिकारमण ! ॥२३॥

हे ज्ञान एवं योग से परिपूर्ण ! हे कल्याण कारक ! हे पचास अक्षरों के शरीर धारण करने वाले ! हे पापको जला देने वाले ! हे पञ्चाक्षर मन्त्रके अन्दर विचरण करने वाले, हे शक्ति के पति ! हे अमृतपिण्ड पिण्डेश्वर ! हे शिव ! मेरी रक्षा करें ।

बालेन्दुमुकुट ! दृक्तटफालेक्षणदहनदग्धकुसुमवाण ! ।
पद्मातिप्रिय ! सदुदय ! पिण्डेश्वर ! पाहि चण्डिकारमण ! ॥२४॥

हे बालचन्द्रको मुकुट में धारण करने वाले ! हे मस्तक स्थित नयन के कोंण से उत्थित अग्नि के द्वारा कामदेव को जला देने वाले ! हे पार्वती स्वरूप लक्ष्मी के प्रिय ! हे सत्कर्मों के उदय ! हे शक्ति के पति ! अमृतपिण्ड पिण्डेश्वर शिव ! मेरी रक्षा करें।

पूर्तादिकफलाशय ! धूर्ताशयदूरचरण ! बुधशरण ! ।
प्रालेयशैलशृङ्गग ! पिण्डेश्वर ! पाहि चण्डिकारमण ! ॥२५॥

हे पूर्तादि (धार्मिकता (परोपकार) से युक्त सामजिक निर्माण) कर्म फलके आधार ! हे धूर्तोंके हृदय से दूर रहने वाले ! हे जञ्जनों को शरण देने वाले ! हे हिमालय शैल शृग में रहने वाले ! हे शक्ति के पति ! हे अमृत-पिण्ड पिण्डेश्वर ! मेरी रक्षा करें।

पिण्डेषु सततसन्तत ! चण्डेषु ! प्रकरदलितरिपुखण्ड ! ।
मूर्तामूर्त ! चिदात्मक ! पिण्डेश्वर ! पाहि चण्डिकारमण ! ॥२६॥

हे ब्रह्माण्डादि पिण्डों से लेकर जीव स्वरूप पिण्डों में भी सदैव रहने वाले ! हे विष्णु वैश्वानर स्वरूप वाणको धारण करने वाले ! हे रिपुदलको दलित करने वाले ! हे मूर्ति एवं अमूर्ति स्वरूप रहने वाले ! हे चैतन्य ब्रह्म-स्वरूप ! हे शक्ति के पति ! हे अमृतपिण्ड-पिण्डेश्वर शिव ! मेरी रक्षा करें।

विद्याविवेकविःश्वासमूर्तिधर ! अनन्तपूजितचरण !
खण्डेन्दुचूड ! हर !मृड ! पिण्डेश्वर ! पाहि चण्डिकारमण ! ॥२७॥

हे विद्या विवेक एवं विःश्वास से मूर्ति धारण करने वाले ! हे अनन्त-विष्णु के द्वारा पूजित चरण ! हे अर्धचन्द्र को शिरमें धारण करने वाले ! हे संपूर्ण पाप एवं अनिष्टों तथा भवरोग को ही हरण करने वाले ! हे संपूर्ण जगत् को सुख देने वाले ! हे शक्ति के पति ! हे अमृत पिण्ड-पिण्डेश्वर शिव ! मेरी रक्षा करें।

इति स्तुत्वा महादेवं पिण्डेश्वरमनन्यधीः ।
आनन्दनीरधौ मग्नस्तूष्णीमासीत् पितामहः ॥२८॥

हे देवी ! हे ऋषीश्वरों ! तनमन को वश में रख कर एकाग्र हो भगवान् पिण्डेश्वर की इस तरह से स्तुति करने के बाद, आनन्द समुद्र में मग्न पितामह चुप हो गए ।

तमुवाच ततोदेवः पिण्डेशश्चतुराननम् ।

जब ब्रह्मा जी चुप हुए तो भगवान् पिण्डेश्वर ने ब्रह्माजी से कहा ।

शिवः पिण्डेश्वर उवाच

किमर्थं तप्यसे ब्रह्मन् ! किन्ते मनसि काङ्क्षितम् ॥२९॥

भगवान् शिव पिण्डेश्वर कहते हैं ।

हे ब्रह्माजी ! आप क्यों तपस्या कर रहे हैं ? आप के मन में क्या अभिलासा जम गई है, बताइए ?।

तद् वृणुष्वाविशङ्केन ददामि तव वाञ्छितम् ।
तपसा तव तुष्टोऽहं सुतप्तेन चतुर्मुख ! ॥३०॥

जो आपको चाहिए वह वेखट्के आप मागें, आप जो चाहेंगे वह मैं दूँगा । हे चतुर्मुख ब्रह्माजी ! आपने भली भाँती मेरी तपस्या की है । आपकी तपस्या से मैं सन्तुष्ट हो गया हूँ ।

इति तस्य वचः श्रुत्वा देवदेवस्य शूलिनः ।
प्रत्युवाच प्रजाध्यक्षः पिण्डेशं चनुराननः ॥३१॥

देवदेव शूलपाणी भगवान् पिण्डेश्वर के इस तरह के वचनों को सुनकर चतुरानन प्रजाके अध्यक्ष ब्रह्मा जी ने भी भगवान् पिण्डेश्वर से कहा ।

ब्रह्मोवाच

सृष्टोऽहं भवता देव ! प्रजाः स्रष्टुं महेश्वर ! ।
न ज्ञायते मया किञ्चित् प्रजाः स्रष्टुं चतुर्विधाः ॥३२॥
अतस्तद्विषयं ज्ञानं देहि शक्तिं च में प्रभो ! ।
त्वत् प्रसादेन देवेश ! ज्ञानवाँञ्छक्तिमाँश्च सन् ॥३३॥
स्रक्ष्यामि विविधाँल्लोकान् यथापूर्वं महेश्वर ! ।
प्रसन्नो यदि मे देव ! दीयतां काङ्क्षितं मम ॥३४॥

चतुर्मख ब्रह्मा जी शिव से विनती कहते हैं।

हे महेश्वर ! हे देव ! प्रजा सृष्टि करने के लिए आपने हमें सृष्टि किया है। किन्तु हे देव ! किस उपाय से मैं चतुर्विध प्रजाओं को सृष्टि करूँ, कुछ सूझता ही नहीं है। अत एव हे शंकर ! सृष्टि विषयक ज्ञान एवं शक्ति आप हमें दें। आप की करुणा कृपा से हे देवेश ! मैं ज्ञानवान् शक्तिमान् होकर जैसे पहले था वैसे ही विविध लोकों में सारी प्रजा को सृष्टि कर सकूँ। हे देव ! यदि आप मुझसे प्रसन्न हो गए हैं तो यही मेरी अभिलासा पूर्ण कर दें।

इति तस्य वचः श्रुत्वा पद्मजस्य महेश्वरः।
सम्प्रत्युवाच पिण्डेशस्तपसा तस्य तोषितः ॥३५॥

ब्रह्मा जी की ऐसी वाणी सुनकर, वह्मा जी की तपस्या से सन्तुष्ट पिण्डेश्वर भगवान् महेश्वर भी इस तरह ब्रह्मा जी से कहने लगे।

पिण्डेश्वर उवाच

मत् प्रसादेन ते ब्रह्मन् ! लोकान् स्रष्टुं चराचरान्।
ज्ञानशक्तिश्च बुद्धिश्च भविता नात्र संशयः ॥३६॥

भगवान् पिण्डेश्वर शिव कहते हैं।

हे ब्रह्मा जी ! मेरी कृपा से चर अचर चतुर्विध जीवात्मा सहित सारे लोकों को सृष्टि करने की शक्ति आपको प्राप्त हो जायगी। ज्ञान शक्ति और बुद्धि से परिपूर्ण होकर आप सृष्टि करेंगे।

इत्युक्त्वा देवदेवेशः पश्यतः परमेष्ठिनः।
ततैवान्तर्दधे सद्यः श्रीमान्पिण्डेश्वरस्ततः ॥३७॥

इतना कहकर ब्रह्मा जी के देखते-देखते ही देवदेवेश श्रीमान् अमृतपिण्ड पिण्डेश्वर भगवान् वहीं अन्तर्धान हो गए।

ततः पितामहो देवः पिण्डेशस्य प्रसादतः।
लब्ध्वा ज्ञानञ्च शक्तिञ्च नमस्कृत्य पुनः पुनः ॥३८॥

स्नानं कृत्वा सूर्यकुण्डे सूर्यपर्वणि सादरम् ।
नमस्कृत्यादिवाराहं कोकामुखमुपागतः ॥३९॥
तत्र स्नानादिकं कृत्वा गायत्रीं वेदमातरम् ।
सस्मार स्मरणात्तस्य गायत्री ब्रह्मलोकतः ॥४०॥
आजगाम विशालाक्षी ब्रह्मणः शक्तिरुत्तमा ।
तया समन्वितो देवः ससर्ज विविधाः प्रजाः ॥४१॥

शिव अन्तर्धान हो जाने के बाद, भगवान् पिण्डेश्वर शिव के प्रसाद से ज्ञान और शक्ति को प्राप्त कर, भगवान् पिन्डेश्वर को बार बार नमस्कार कर के, सूर्य पर्व (रविवार, रवियुक्त पुण्य तिथियों) में सादर (भक्ति युक्त हो) सूर्यकुण्ड में स्नानकर आदिवाराह भगवान् विष्णु को नमस्कार करके, कोका और कौशिकी के संगम पर स्नान कर[1] ब्रह्मा जी ने वेदों की माता गायत्री का संस्मरण किया। ब्रह्मा जी के स्मरण करते ही ब्राह्मणों की उत्तम शक्ति स्वरूपिणी गायत्री देवी भी ब्रह्मलोक से ब्रह्मा जी के सामने उपस्थित हुई। विशाल नयन वाली गायत्री देवी से युक्त होकर ब्रह्मा जी ने विविध प्रजाओं की सृष्टि की।

एवं प्रभावः पिण्डेशो ब्रह्मणोऽपि वरप्रदः ।
द्रष्टव्यः सर्वयत्नेन काङ्क्षमाणैः शुभं नरैः ॥४२॥

हे देवी !, हे ऋषीश्वरों ! भगवान् पिण्डेश्वर इसी तरह के प्रभावशाली हैं, जो ब्रह्मा जी को भी वरप्रदान करते हैं। अतएव अपनी उत्तरोत्तर उन्नति की इच्छा करने वाले मानवों को चाहिए कि हर प्रयास से जीवन में एक बार भगवान् पिण्डेश्वर का दर्शन करलें।

इति श्रीस्कन्दपुराणे हिमाद्रिखण्डे पूर्वभागे रुद्राक्षारण्य-
माहात्म्ये लक्ष्मीललितटीकायां पिण्डेश्वरवरप्रसादो
नाम पञ्चदशोऽध्यायः ॥१५॥

---

१. वराहक्षेत्र से ऊपर भगनावशेष के रूप में सूर्यकुण्ड आज भी विद्यमान है। ब्रह्मानन्द नदी (खोलो) भी आज तक जीवित है।

अथ षोडशोऽध्यायः

शिव उवाच

अथ ते कथयिष्यामि कथामन्यां शुभप्रदाम् ।
पिण्डेश्वरस्य माहात्म्यद्योतिनीं शत्रुघातिनीम् ॥१॥

भगवान् शिव कहते हैं ।

हे पार्वती !, भगवान् पिण्डेश्वर के माहात्म्य को बढ़ाने वाली, शत्रुओं को नाश करने वाली, उत्तरोत्तर मङ्गल बढ़ाने वाली, और एक कथा मैं तुम्हें सुनाउगा, हे देवी ! तुम सावधान होकर सुनो ।

पिण्डेश्वरप्रसादेन लब्धकामः पितामहः ।
ससर्ज सकलाँल्लोकान् भूत्वा शक्तिसमन्वितः ॥२॥

भगवान् पिण्डेश्वर के वरप्रसाद से पितामह ब्रह्मा जी की कामना पूर्ति हुई, और उसी वरप्रसाद के प्रभाव से शक्ति सम्पन्न होकर संपूर्ण लोक की ब्रह्मा जी ने सृष्टि की ।

ब्रह्मणा सृष्टलोकानां रक्षणाय नियोजितः ।
शिवेन देवदेवेन महाविष्णुमहीयसा ॥३॥

तो, हे देवी ! ब्रह्मा जी के द्वारा सृष्ट लोकों को रक्षा करने के लिए देवदेव शिव ने महाविष्णु को नियोजित (नियुक्त) किया था ।

अशक्तः सर्वलोकानां रक्षणायाम्बुजेक्षणः ।
शीतशैलेन्द्रमासाद्य पिण्डेश्वरसमीपतः ॥४॥
तपश्चचार परमं दिव्यं वर्षसहस्रकम् ।
रुद्राक्षमूलजं तोयं भद्राक्षमूलजं तथा ॥५॥
हिमाचलोच्चशिखरपुण्यभूरुहमूलजम् ।
एषां त्रयाणां संयोगस्त्रिवेणीति निगद्यते ॥६॥
तत्र स्नानादिकं कृत्वा जलमादाय निर्मलम् ।
स्नापयामास पिण्डेशं रुद्रसूक्तैः समर्चयन् ॥७॥

स्वयं निपतितैर्वृक्षाज्जलप्रक्षालितैः शुभैः ।
रुदाक्षपत्रैर्धत्तूरैर्बिल्वपत्रैर्मनोहरैः ॥८॥
नाना सुगन्धिपुष्पैश्च पूजयामास सादरम् ।
इमं स्तवं पठन्नित्यं पिण्डेशप्रीतिकारकम् ॥९॥

संपूर्ण लोकों की रक्षा करने में असमर्थ कमलेक्षण विष्णु पिण्डेश्वर शिव के पास हिमालय पर्वत भाग शीत शैल विजयपुर में जाकर दिव्य हजार वर्ष तक तपस्या में संलग्न रहे। रुद्राक्ष वृक्ष मूल से उत्पन्न जल से निर्मित एवं भद्राक्ष वृक्षके मूलों से उत्पन्न जल से निर्मित रुद्रवारि एवं भद्रवारि एवं हिमालय पर्वत के उच्च उच्च अनेक शिखरों से उत्पन्न जल से निर्मित तमोरि, इन तीन नदों के समूहको त्रिवेणी (नद त्रिवेणी) कहते हैं। वहाँ स्नानादि कृत्य करके[1] निर्मल जल लेकर, विजयपुर में आकर, भगवान् पिण्डेश्वर को स्नान करा कर, रुद्रसूक्त (रुद्राष्टाध्यायी) से पूजा अर्चना जलधारा इत्यादि करके, वृक्ष से स्वयं पतित रुद्राक्ष पत्र पुष्प धत्तूर पुष्प, विल्वपत्र आदि को जल प्रक्षालन से शुद्धकर, नाना सुगन्धि द्रव्यों से और पुष्पों से भगवान् पिण्डेश्वर को पत्र पुष्पाञ्जलि समर्पित कर भगवान् विष्णु पिण्डेश्वर शिवकी आराधना करने लगे। आराधना के अन्त्य में पिण्डेश्वर को प्रसन्न करने के लिए इस स्तोत्रको पाठ करते रहे।

महाविष्णु उवाच

त्वं सर्वभूतपतिरित्यखिलान्तरात्मे—
त्यव्याजनिर्भरघृणाशरणं सखेति ।
सद्वृन्दवन्दितगुण ! त्रिपुरान्तक ! श्री-
पिण्डेश्वर ! प्रणतपाल ! मयि प्रसीद ॥१०॥

भगवान् महाविष्णु शिव स्तोत्र पाठ करते हैं।

हे शिव ! आप संपूर्ण भूत प्राणियों के पति हैं, यह मैं जानता हूँ। संपूर्ण विश्व की अन्तरात्मा भी आप ही हैं, यह भी मैं जानता हूँ। छल

---

[1] तेलिया एवं छरुवा नाम से प्रसिद्ध खोला (रुद्रवारि, भद्रवारि नद जो तमोरि, तमर) से मिलती हैं, इनका सङ्गम नद त्रिवेणी है।

कपट रहित एकान्तिक आपकी ममता भी मुझ पर है, आप ही मेरे शरण्य हैं। हे महादेव ! इतना मात्र नहीं किन्तु आप मेरे साथी सहयोगी अनन्य मित्र भी हैं। हे त्रिपुरान्तक ! आपके गुणों को सत् वेदादि और सज्जनों ने अनेक गाए हैं। हे विनम्रजन प्रतिपालक ! हे अमृत पिण्ड पिण्डेश्वर ! आप मुझसे प्रसन्न हों।

पञ्चास्य पञ्चशरनाशनकारणस्त्वं
पञ्चेन्द्रियेश ! धरणीधर-शोभितस्त्वम् ।
पञ्चप्रपञ्चपरिरक्षणकर्णधार !
पिण्डेश्वर ! प्रणतपाल ! मयि प्रसीद ॥११॥

हे पञ्चमुख शिव ! पञ्चबाण धारण करने वाले कामदेव को विनाश करने में कारण स्वरूप आप ही हैं। हे पाँचों इन्द्रियों के ईश्वर ! आप नागों के द्वारा शोभित हैं। हे पञ्चमहाभूत के पञ्चीकरण आदि प्रपञ्चों को रक्षण करने में (जगत् रक्षा करने में) कर्णधार शिव ! हे अमृतपिण्ड पिण्डेश्वर ! हे प्रणत जन पालक ! आप मुझसे प्रसन्न हों।

पञ्चास ! पञ्चशरसञ्चयवञ्चितोऽहं,
पञ्चाशुगात्र ! धरणीधरमण्डनस्त्वम् ।
पञ्चाशवर्णमय ! पञ्चमनुस्वरूप !
पिण्डेश्वर ! प्रणतपाल ! मयि प्रसीद ॥१२॥

हे पञ्चाक्षर मन्त्र में विचरण करने वाले ! शंकर ! मैं तो पञ्चशरों के सञ्चयों से ताडित हूँ। हे पञ्चप्राणमय शरीर धारण करने वाले देव ! आप नागों से अलङ्कृत हैं। हे स्वर व्यञ्जन अँ: आदिनाद मङ्गल श्री सम्पन्न शरीर धारण करने वाले शिव अक्षरमय ! आप पञ्चमनु (मनु-अवबोधन-जागरण-जीवन-पञ्चप्राण) जीवनतत्वमय शरीर संपन्न हैं। हे विनम्र जन पालक ! अमृतपिण्ड पिण्डेश्वर ! आप मुझसे प्रसन्न हों।

अत्ता समस्तजगतां त्वमसि त्रिनेत्र !
सत्ताप्रदश्च जगतां भगवंस्त्वमेव ।
वित्तादिभिर्विरहिते शरणं गते त्वां
पिंडेश्वर ! प्रणतपाल ! मयि प्रसीद ॥१३॥

हें गुणात्मकनयन ! तीन नयनधारण करने वाले देव ! सारे जगत् के हर्ता कर्ता रक्षक आप ही हैं। हे देव ! हे भगवन् ! इस जगत् को सत्ता प्रदान करने वाले भी आप ही हैं। वौद्धिक एवं भौतिक संपत्ति से रहित होकर के आपके चरण का शरणागत मुझसे हे अमृतपिण्ड-पिण्डेश्वर ! हे प्रणतजन पालक ! आप प्रसन्न हों।

चिद्राजबिम्बगलितामृतचारुधारा-
दूरीकृतामय-निरामय-वीरगेय !।
श्रेयःप्रदाश्रितवतां महतां विधेय
पिण्डेश्वर ! प्रणतपाल ! मयि प्रसीद ॥१४॥

हे शिव ! आप, चैतन्य अमृत चन्द्र बिंब में भरपूर होकर गिरे हुए रस धारा को पीकर अथवा उन रसधाराओं में स्नान कर, जिन्होंने भवरोगों को दूर कर दिया है, अत एव जो स्वस्थ हो गये हैं ऐसे वीर व्यक्तियों के द्वारा, ज्ञेय हैं और आश्रित भक्तों का कल्याण करते हैं, और उन्हीं भक्तों को विशेष प्रेम करते हैं, यहाँ तक कि अपने आप भी उन्हीं के वशीभूत होकर सेवक के तरह उनकी आज्ञा पालन करते हैं। हे प्रणतजन पालक ! अमृतपिण्ड पिण्डेश्वर ! मुझसे आप प्रसन्न हों।

ताराधिनाथरुचिगौरशरीर ! नील—
धाराधराभगल ! बालसुधांशुमौले !।
घोरारिभिर्विदलिते पतिते भवाब्धौ,
पिण्डेश्वर ! प्राणतपाल ! मयि प्रसीद ॥१५॥

हे देव ! आप चन्द्रमा के समान गौर वर्ण का शरीर धारण करते हैं और मेघ के समान नीला रङ्ग का आपका गला है, एवं अरुण पिङ्गल जटा-मुकुट में वालचन्द्र को धारण करते हैं। हे भगवन्, मैं तो अति भयानक जन्म मरण जरा व्याधि स्वरूप अरियों से (शत्रुओं से) विदलित हो गया हूँ, भव-सागर में गिर गया हूँ, पुत्र पौत्रादि जलजन्तु खानेको दौड़ रहे हैं, हे प्रणतजन पालक ! अमृतपिंड पिण्डेश्वर ! आप मुझसे प्रसन्न हों।

चण्डांशुचण्डरुचिमण्डलखण्डनश्री-
भास्वत्कपर्द ! शुभहार्द्र ! जनार्दनार्च्य ।
दुर्दान्तिहार्दजविमर्दितमानसे, श्री-
पिण्डेश्वर ! प्रणतपाल ! मयि प्रसीद ॥१६॥

हे देव ! आप सूर्यमण्डल की कान्ति को भी जीतने वाली कान्ति से सुसंपन्न जटा-मुकुट को धारण करते हैं। मङ्गलमय हृदय जनार्दन द्वारा पूज्य हे शिव ! सर्व ऐश्वर्य संपन्न अमृतपिण्ड पिण्डेश्वर ! हे प्रणतजन पालक ! मैं तो अजेय और अपने आप स्वहृदय में ही पैदा होने वाला अरि (शत्रु) भूत इच्छादि कामनाओं से कुण्ठित चित्त बुद्धि वाला हो गया हूँ, आप मुझसे प्रसन्न हों।

दक्षाध्वरक्षपण ! रक्षितपक्षिवाह !
यक्षाधिराजसख ! शिक्षितवैरिपक्ष !।
भिक्षाशिभिः स्वहृदि लक्षितशान्तरूप ।
पिण्डेश्वर ! प्रणतपाल ! मयि प्रसीद ॥१७॥

हे दक्षयज्ञहर ! हे विष्णु-पक्ष के रक्षक ! हे कुबेर के (धनाध्यक्ष के) मित्र ! वैरिपक्ष (दानव पक्ष) को शिक्षा देने वाले ! भिक्षान्नभोजी सज्जन साधु महात्माओं के हृदय में शान्त (शान्ति के प्रतीक) रूप में प्रस्फुरित होने वाले हे प्रणतजन पालक ! अमृतपिण्ड पिण्डेश्वर ! आप मुझसे प्रसन्न हों।

क्वाहं पशुः पशुपते ! पतिताग्रगण्यः ?
पुण्यं भवत्पदसरोरुहदर्शनं क्व ?
प्राप्तो भवत्करुणया चरणं तवाद्य
पिण्डेश्वर ! प्रणतपाल ! मयि प्रसीद ॥१८॥

हें पशुपते ! आप प्रजारूप (जीवात्मा स्वरूप) पशुओं के पति हैं, तो भगवन् ! मैं तो पशु हूँ, और पतितों में अग्रगण्य हूँ। पुण्यमय आपके चरण

कमलों का दर्शन कहाँ, और मैं खलनायक कहाँ ? तो भी मैंने आज आपके चरण-कमलों का दर्शन कर लिया, आपकी ही यह करुणा है। हे प्रणतजन पालक ! अमृतपिण्ड पिण्डेश्वर शिव ! आप मुझसे प्रसन्न हों।

त्वं जातु चित्तनुभृतां हृदये धृतश्चेत्,
तं जातबोधविभवं विभवं करोषि।
किं जातके समुचिता तव मय्युपेक्षा ?
पिण्डेश्वर ! प्रणतपाल ! मयि प्रसीद ॥१९॥

हे भगवन् ! आपको कोई भी चैतन्य युक्त जीवात्मा अपने हृदय में कथञ्चित् भूल भटक में भी जमा लेता है, चन्द समय के लिए ही हो, तो भी उसे आप ज्ञान (बोधमय) सम्पत्ति का धनी बना देते हैं। तो बताइए ! मैं आपका ही तो जातक (पुत्र) हूँ, बताइए ! मेरे प्रति आपकी उपेक्षा क्या उचित है ? हे प्रणतजन पालक ! अमृतपिण्ड पिण्डेश्वर शिव ! आप मुझसे प्रसन्न हों।

यस्ते प्रतापविभवस्त्रिपुरं निहन्तुम्,
कर्तुं निहन्तुमपि यत्तव देव ! शौर्य्यम्।
तेनाद्य पालय विभो ! शरणागतं मां,
पिण्डेश्वर ! प्रणतपाल ! मयि प्रसीद ॥२०॥

हे शिव ! आपका प्रताप, त्रिपुर (स्वर्ग-मर्त्य-पाताल, भूर्भूवःस्वः, त्रिपुरासुर के तीन पुर) को बनाने और संरक्षण करने तथा बिगाडने में समर्थ है, तो हे देव ! उसी शक्ति से शरणागत मुझे भी आप पालन करें। हे प्रणतजन पालक ! अमृतपिण्ड पिण्डेश्वर शिव ! आप मुझसे प्रसन्न हों।

इमं स्तवं पठन्नित्यं पिण्डेश्वरमनःप्रियम्।
चचार परमं तीव्रं तपः कमललोचनः ॥२१॥

हे देवी ! हे ऋषीश्वरों ! भगवान् पिण्डेश्वर को रुचिकर इस स्तोत्र को नित्य पाठ करते हुए कमललोचन भगवान् महाविष्णु ने अति कठोर तपस्या की।

तप्यमाने तपस्तीव्रं देवदेव - जनार्दने ।
दिव्यं वर्षसहस्रं च व्यतीतं निमिषार्धवत् ॥२२॥

देवदेव जनार्दन भगवान् महा विष्णु के तप करते हुए, दिव्य हजारों वर्ष भी आधी निमेष के तरह व्यतीत हो गये ।

ततः प्रसन्नो भगवाञ्छ्रीमत्पिण्डेश्वरः स्वयम् ।
प्रादुर्बभूव पुरतो बालाम्बा-सहितस्तदा ॥२३॥
प्रसन्नवदनाम्भोजः प्रसादाभिमुखेक्षणः ।
रमाकान्तस्य पुरतः प्रादुर्भूय व्यवस्थितः ॥२४॥

उसके बाद भगवान् पिण्डेश्वर भगवान् महा विष्णु के प्रति प्रसन्न हो गये । प्रसन्न मुद्रा में विराजमान, प्रसन्नता प्रकट करने में आतुर एवं बालाम्बा से सहित होकर स्वयं भगवान् पिण्डेश्वर भगवान् विष्णु (रमा के पति) के सामने प्रकट हो कर सामने ही स्थिर रहे ।

तं विलोक्य पुरः सन्तं पिण्डेश्वरमधीश्वरम् ।
प्रहृष्टः प्रणतो भूत्वा बद्धाञ्जलिपुटः स्थितः ॥२५॥
आनन्दवाष्पपूर्णाक्षो हर्षगद्गदया गिरा ।
तुष्टाव कमलाकान्तः पिण्डेश्वरमनन्यधीः ॥२६॥

संपूर्ण लोक के अधीश्वर, अमृतपिण्ड भगवान् पिण्डेश्वर को अपने सामने में उपस्थित देखकर भगवान् विष्णु अति प्रसन्न हुए और हाथ जोड़कर विनम्र हो आनन्दाश्रुओं को बहाते हुए हर्ष से गद्गद हो कर भगवान् पिण्डेश्वर के प्रति दत्तचित्त होकर इस स्तोत्र से स्तवन करने लगे ।

महाविष्णुरुवाच

सन्ध्यारागसरागभासुरजटाभाराय धाराधर-
छायासोदरकन्धराय शशभृन्नीहारहारत्विषे ।
हारीभूतभुजङ्गमाधिपतये वेदान्तवेद्यश्रिये
पिण्डेशाय नमः शिवाय गुरवे नादान्तनागात्मने ॥२७॥

भगवान् महाविष्णु शिव-स्तुति करते हैं--

सन्ध्या समय के सूर्य की लालिमा से तुल्य लाल पीली एवं भूरी जटा भारको (जटाजूट को) धारण करने वाले, तथा जलयुक्त मेघकान्ति के समान कण्ठ (नीलकण्ठ) धारण करने वाले और चाँदनी के समान उजियारा, हिमके समान शीतल, मोती के समान चमक युक्त देहकान्ति से विराजमान हे शिव ! आपने भुजङ्गाधिपति नागों को हार के स्थान में पहिरा है। आप वेदान्त विद्या में निपुण ज्ञानवानों के ऐश्वर्य हैं। हे नादबिन्दु (योगशास्त्र प्रसिद्ध ॐ के ऊपर का बिन्दु) के अन्त्य में स्थिर रहने वाले ! हे ब्रह्माण्ड पिण्ड के प्रतीक ! हे अमृतपिण्ड पिण्डेश्वर ! अन्धकार से उजियारे के तरफ ले जाने वाले हे शिव ! आप को नमस्कार है।

वेद्यातीतचिदात्मने विदलितावेद्याय वेदाशयै-
र्वेद्याय स्वसुखानुभूतिमुदितस्वान्ताय शान्तात्मने।
सद्धात्रादिभिरर्चिताय धरणीवृन्दारवृन्दैः सदा,
पिण्डेशाय नमः शिवाय गुरवे नादान्तनागात्मने ॥२८॥

हे भगवन् ! आपसे परिचित होना असंभव है, आप वेद्य वस्तुओं से अतीत हैं, किन्तु आप चित् आत्मा (चेतन आत्मा) स्वरूप हैं। अज्ञान को नाश करने वाले एवं ज्ञान स्वरूप वेदों के आशयों को (सारभूत तथ्यों को) जानने वाले आपको जानते हैं। आप स्वात्मानन्दानुभूति से मुदित अन्तः-करण वाले हैं। आप शान्त आत्मा से युक्त हैं। आप सत्य हैं, और ब्रह्मा विष्णु इन्द्र पृथिवी आदि देवताओं के द्वारा पूजित चरण हैं। हे अन्धकार से उजियारे के तरफ ले जाने वाले ! नादबिन्दु के अन्त्य में नाग स्वरूप होकर स्थिर रहने वाले ! ब्रह्माण्ड पिण्ड के प्रतीक अमृतपिण्ड पिण्डेश्वर शिव आपको नमस्कार है।

गोत्राधीश्वरनन्दिनीप्रविलसद्गात्राय धात्रादिभि-
र्गात्रैः स्वैर्जगदुद्भवस्थितिलयक्रीडां सदा कुर्वते।
चिद्व्योमाऽमृतसिन्धुबन्धुरझरीदोलाविहाराय ते
पिण्डेशाय नमः शिवाय गुरवे नादान्तगागात्मने ॥२९॥

हे पर्वतराज हिमालय की पुत्री पार्वती के आधो अंग से सुशोभित अर्धनारीश्वर हर ! आप ब्रह्मा विष्णु रुद्र आदि प्रजापतियों के रूप को धारण कर सृष्टि पालन संहार आदि कर्मों से क्रीड़ा करते हैं। और आप अमृतमय चैतन्यब्रह्मसिन्धु के ऊर्मियों में झूला विहार करते हैं। हे अन्धकार से उजियारे के तरफ ले जाने वाले, नादविन्दु के अन्त्य में नागस्वरूप स्थिर होकर रहने वाले ! ब्रह्माण्ड पिण्डके प्रतीक ! हे अमृतपिण्ड परमेश्वर पिण्डेश्वर शिव ! आपको नमस्कार है।

विश्वाकारविराजिताय विबुधस्तुत्याय सत्यात्मने
विश्वोत्तीर्णमहाप्रमातृवपुषे विद्यापुषे श्रीपुषे।
विश्वत्राणपरायणाय विजिताभित्राय मित्रत्विषे
पिण्डेशाय नमः शिवाय गुरवे नादान्तनागात्मने ॥३०॥

हे विश्वस्वरूप से विराजमान शिव ! विद्वान् बुद्धिमान् जन आपकी स्तुति करते हैं। आप सत्यात्मा हैं। हे भगवन् ! विश्व से भी वृहत् शरीर को धारण करने वाले आप विद्या से ही पुष्ट हैं, श्री आदि ऐश्वर्य से युक्त हैं। विश्व रक्षा करने में आप व्यस्त हैं, हलाहल पान करके भी विश्व को आपने बचाया है। शत्रुओं को जीतने वाले आप सूर्य सम कान्ति से युक्त हैं। अन्धकार से उजियारे के तरफ ले जाने वाले हे भगवन् ! आप नादविन्दु के अन्त्य में नाग स्वरूप रेखा में स्थिर रहते हैं। हे ब्रह्माण्ड पिण्ड के प्रतीक ! हे अमृतपिण्ड पिण्डेश्वर शिव ! आपको नमस्कार है।

वीराराधितपादुकाय विपदां जेत्रे लवित्रे रुजां,
राजद्राजकलाविराजितजटाजूटस्फुरन्मौलये ।
दारिद्र्यद्रुमभञ्जनाय दमिनां दारिद्र्यदात्रेऽसतां
पिण्डेशाय नमः शिवाय गुरवे नादान्तनागात्मने ॥३१॥

हे भगवन् ! आप विश्ववीरों के द्वारा पूजित चरण हैं। विपत्तियों को जीतने वाले हैं। रोगों को दूर करने वाले हैं। पूर्ण प्रकाशित चाँदनी से सुशोभित जटाजूट को धारण करने वाले हे शिव ! आप सन्तों के लिए दरिद्रता

स्वरूप जङ्गली पेड़ों को तोड़ देने वाले हैं। असन्तों के लिए दरिद्रता बढ़ा देने वाले हैं। अन्धकार से उजियारे के तरफ ले जाने वाले ! नादविन्दु के अन्त्य में स्थिर होकर रहने वाले हे ब्रह्माण्ड पिण्ड के प्रतीक अमृतपिण्ड पिण्डेश्वर शिव ! आपको नमस्कार है।

नीहाराचलतुङ्गशृङ्गरचितावासाय दासायित-
ब्रह्मादित्रिदशेन्द्रवन्दितपदद्वन्द्वाय बिन्द्वात्मने।
स्वर्गङ्गाजलतुङ्गभङ्गलहरीधाराभृते श्रीमते
पिण्डेशाय नमः शिवाय गुरवे नादान्तनागात्मने ॥३२॥

हिमालय पर्वतराज के चोटियों में निवास करने को विशेष रुचि रखने वाले हे शिव ! ब्रह्मादि देवताओं के द्वारा दास बन कर आराधित चरण युगल वाले ! आप विन्दु (वीज) स्वरूप ॐ के ऊपर का ँ बिन्दु) हैं, और अपनी ऊर्मियों से उत्तुङ्ग स्वर्गङ्गा को जुटामुकुट में धारण करते हैं। श्री आदि ऐश्वर्य संपन्न हैं। हे नादविन्दु के अन्त्य में स्थिर होकर रहने वाले ! अन्धकार से उजियारे के तरफ ले जाने वाले ! ब्रह्माण्डपिण्ड के प्रतीक, अमृतपिण्ड भगवान् पिण्डेश्वर शिव ! आपको नमस्कार है।

निःश्वासायितनैगमाय महते पश्वादिहृत्सद्मने
मानातीतघृणाघनाय महतां मान्याय दैन्यच्छिदे।
नेत्रीभूतकृशानुभानुशशिने वन्दारुशंदायिने,
पिण्डेशाय नमः शिवाय गुरवे नादान्तनागात्मने ॥३३॥

हे भगवन् ! आपके निश्वास से निर्मित निगम (वेद) हैं। आप महत् तत्त्व स्वरूप हैं, अपरिमेय हैं। आप चतुर्विध जीवात्माओं के (प्रजा-पशुओं के) हृदय रूप घर में (सभी के घट-घट में) विराजमान हैं। हे शिव ! आप विशिष्ट भक्तों के लिए अपरिमेय दया के सागर हैं। आप विशिष्ट जनों के द्वारा मान्य हैं। दरिद्रता को हटाने वाले हैं। हे हर ! सूर्य अग्नि एवं चन्द्र आपके नेत्र हैं। भक्तों को कल्याण देने वाले हैं। हे अन्धकार से उजीते के तरफ ले जाने वाले देव ! आप नादबिन्दु के अन्त्य में स्थिर रहते हैं,

अनुरणन स्वरूप हैं। हे ब्रह्माण्ड पिण्ड के प्रतीक, अमृतपिण्ड पिण्डेश्वर शिव ! आपको नमस्कार है।

हुङ्कारक्षत-पङ्कजास्त्रवपुषे स्वानन्दसम्पज्जुषे
रोषध्वस्तपुरत्रयाय दमिने दक्षाध्वरध्वंसिने।
विद्या-दानविशारदाय शमिताविद्याय विद्यात्मने
पिण्डेशाय नमः शिवाय गुरवे नादान्तनागात्मने ॥३४॥

हे भगवन् ! अपके हुंकार से ही कमलशर कामदेव ध्वस्त हो गया। आपके रोष से ही त्रिपुर जल गया। आप स्वात्मानन्द संपत्ति से युक्त हैं। आप इन्द्रियजयी हैं। आप दक्षयज्ञ को ध्वंस करने वाले हैं। आप विद्याके अधिष्ठाता देवता हैं, अतः विद्यादान देने में विशारद हैं, विख्यात हैं। अज्ञान को शमन करने वाले हैं। हे शिव ! आप विद्यात्मा हैं। अन्धकार से उजीते के तरफ ले जाने वाले ! आप नादबिन्दु के अन्त्य में स्थिर रहते हैं। हे ब्रह्माण्ड पिण्ड के प्रतीक, अमृतपिण्ड पिण्डेश्वर शिव ! आपको नमस्कार है।

स्वेच्छाशक्तिविलासलालितशरीरायामृताम्भोनिधि-
क्षीरस्वारपटीरहारघनसारासारहीरत्विषे ।
भाषाधीश्वरवन्दिताय धिषणाहीन्द्रस्तुतार्थश्रिये
पिण्डेशाय नमः शिवाय गुरवे नादान्तनागात्मने ॥३५॥

हे भगवन् ! आप अपनी ही इच्छा से विलास के लिए अनेक शरीर (अवतार) धारण करते हैं। आप अमृत समुद्र के समान, क्षीर के सार नवनीत के समान स्निग्ध, मोती के माला के सामन चमक युक्त, कपूर के समान श्वेत सुगन्ध युक्त, हिमके समान शीतल, शरीर को धारण करते हैं, और हीरे के समान नील वर्ण का काण्ड आपका है। भाषा के अधीश्वर ब्रह्मा विष्णु सरस्वती बृहस्पति शुक्राचार्य वाल्मीकि व्यास शेष आदि के द्वारा वन्दित हैं। बुद्धिपूर्वक आपकी स्तुति शेषजी करते हैं। श्री आदि ऐश्वर्य से आप सम्पन्न हैं। हे अन्धकार से उजीते के तरफ ले जाने वाले भगवन् ! आप नादबिन्दु के अन्त्य में स्थिर होकर विराजते हैं। हे ब्रह्माण्ड पिण्ड के प्रतीक ! अमृतपिण्ड पिण्डेश्वर शिव ! आपको नमस्कार है।

इति स्तुत्वा महाविष्णुः पिण्डेश्वरमनन्यधीः ।
प्रणम्य शिरसा भूमौ शतशोऽथ सहस्रशः ॥३६॥
आनन्दाश्रुपरीताक्षो रोमाञ्चिततनूरुहः ।
हर्षेण महता पूर्णस्तूष्णीमासीद्रमापतिः ॥३७॥
तूष्णीभूतं हरिं दृष्ट्वा श्रीमत्पिण्डेश्वरः प्रभुः ।
मेघगम्भीरया वाचा प्रोवाच कमलापतिम् ॥३८॥

इस तरह से एकाग्र चित्त होकर भगवान् पिण्डेश्वर की महाविष्णु ने स्तुति की। स्तुति के बाद भूमि में शिर रख कर शयों बार, हजारों बार प्रणाम किया और सानन्द के आसुओं से भरी आँखें लेकर हर्ष से रोमाञ्चित शरीर होते हुए लक्ष्मीपति भगवान् महा विष्णु चुप हो गए। भगवान् महाविष्णु को चुप होते हुए देख कर भगवान् पिण्डेश्वर शिव मेघ की तरह गम्भीर वाणी से भगवान् महाविष्णु को कहने लगे।

पिण्डेश्वर उवाच

वरं वरय भद्रं ते यत्ते मनसि काङ्क्षितम् ।
प्रसन्नस्तपसा तेऽहं वरं दातुमुपागतः ॥३९॥

भगवान् पिण्डेश्वर शिव कहते हैं—

हे महाविष्णु आपका कल्याण हो। वर माँगिये। जो आपके मन में हो सो माँगिए। मैं आपकी तपस्या से सन्तुष्ट हूँ। आपको वर देने के लिए यहाँ उपस्थित हूँ।

इति श्रुत्वा वचस्तस्य पिण्डेशस्य रमापतिः ।
हर्षगद्गदया वाचा तमुवाच जनार्दनः ॥४०॥

इस तरह की भगवान् पिण्डेश्वर शंकर की वाणी सुनकर हर्ष से गद्गद वाणी में लक्ष्मीपति जनार्दन भगवान् महाविष्णु भगवान् शिव से कहने लगे।

महाविष्णुरुवाच

प्रसन्नो यदि मे देव ! वरं देहि ममेप्सितम् ।
सत्यवाग्भव देवेश ! पिण्डेश्वर ! महेश्वर ! ॥४१॥

भगवान् महाविष्णु कहते हैं—

हे देव ! हे महेश्वर ! हे ब्रह्माण्डपिण्ड के प्रतीक ! हे अमृतपिण्ड पिण्डेश्वर ! यदि आप मुझमें प्रसन्न हो गए हैं तो, मुझे मेरी अभिलषित मनःकामना से सञ्चित वरदान दीजिए। हे देवेश ! आप सत्य वक्ता हैं और सत्य वक्ता ही रहें।

अहं त्वया नियुक्तोऽस्मि लोकानां रक्षणे प्रभो !
अशक्तोऽहं परित्रातुं लोकान्सर्वान् महेश्वर ! ॥४२॥
शक्तिमव्याहतां मह्यं देहि पिण्डेश्वर ! प्रभो ! ।
त्वत्प्रसादेन देवेश ! भूत्वा शक्तिसमन्वितः ॥४३॥
रक्षां करोमि लोकानां त्वदाज्ञां पालयन् प्रभो ! ।
"इति विष्णोर्वचः श्रुत्वा पिण्डेशः प्राह माधवम् ॥४४॥

हे प्रभो ! आपने हमें ब्रह्माजी द्वारा की गई सृष्टि की रक्षा करने का काम दिया है। किन्तु हे नाथ ! मैं इस लोक को कैसे रक्षा करूँ, कुछ उपाय भी मुझे नहीं सूझता है। अतः हे महेश्वर ! लोकों को रक्षा करने में मैं असमर्थ हो रहा हूँ। हे पिण्डेश्वर ! हे प्रभो ! आप मुझे सर्वसमर्थ शक्ति दें। आप की ही कृपा से अव्याहृत शक्ति से युक्त होकर संपूर्ण लोकों को रक्षा करने में मैं समर्थ हो सकूँ। जिससे कि आपकी आज्ञा पालन हो सके, ऐसा उपाय कर दें। भगवान् महाविष्णु की इस तरह की वाणी को सुनकर भगवान् पिण्डेश्वर शिव भगवान् महाविष्णु से कहने लगे।

पिण्डेश्वर उवाच

मत्प्रसादेन ते शक्तिर्भविष्यति रमापते ! ।
यया शक्त्या समायुक्तो लोकाँस्त्वं पालयिष्यसि ॥४५॥

भगवान् पिण्डेश्वर शिव कहते हैं—

हे रमापति ! महाविष्णु ! मेरी कृपा प्रसाद से आपको सृष्टि-रक्षा करने की शक्ति प्राप्त होगी। जिस शक्ति से सम्पन्न होकर आप चराचर संपूर्ण लोकों को सरलता से ही पालन करने में समर्थ हो जायेंगे।

सूत उवाच

इति तस्मै वरं दत्त्वा पिण्डेशः श्रीश्वराय च ।
पूजितो भक्तिभावेन श्रद्धया चक्रपाणिना ।।४६।।

तत्रैवान्तर्दधे देवः पश्यतस्तस्य शार्ङ्गिणि ।
ततः श्रीकमलाकान्तो वरं लब्ध्वा यथेप्सितम् ।।४७।।

पिण्डेश्वरप्रसादेन परं हर्षमुपागतः ।
चकार कमलाकान्तः पिण्डेशस्य महोत्सवम् ।।४८।।

सूतजी कहते हैं ।

हे ऋषीश्वरों ! हे पार्वती ! भगवान् पिण्डेश्वर भगवान् महाविष्णु लक्ष्मी पति को इस तरह से उस प्रकार का वर देकर, उनके द्वारा श्रद्धा भक्ति भावना पूर्वक पूजित हो उनके देखते-देखते ही, वहीं अन्तर्धान हो गए । इसके बाद मनचाहा वर भगवान् पिण्डेश्वर से प्राप्त करके भगवान् महाविष्णु अति प्रसन्न हुए । इसी प्रसन्नता में भगवान् महाविष्णु ने भगवान् पिण्डेश्वर का एक वृहत् उत्सव से आराधन किया ।

वसन्तकाले संप्राप्ते चैत्रे मासि मनोहरे ।
शुक्लप्रतिपदारभ्य पौर्णमास्यवधि प्रिये ! ।।४९।।
रथोत्सवादिकं कृत्वा, पिण्डेश्वरविनिर्मिते ।
शिवगङ्गाभिधे तीर्थे चक्रे चाऽवभृथं ततः ।।५०।।
एवं तस्योत्सवं कृत्वा पिण्डेशस्य रमापतिः ।
जगाम निलयं स्वस्य वैकुण्ठं लोकमुत्तमम् ।।५१।।

वसन्त ऋतु, चैत्र महीना, शुक्ल पक्ष के प्रतिपदा तिथि से आरम्भ कर पूर्णिमा तक १५ दिन तक हे प्रिये ! वह उत्सव चलता है । उस उत्सव में रथोत्सव मुख्य है । पिण्डेश्वर भगवान् शिव के द्वारा निर्मित शिवगङ्गा के तीर्थ में अवभृथ स्नान कर वह उत्सव समाप्त होता है । इस तरह से भगवान् पिण्डेश्वर का उत्सव मनाकर रमापति महाविष्णु अपना आवास उत्तम लोक वैकुण्ठ चले गए ।

ततो ब्रह्मा समागत्य कार्तिके मासि शोभने ।
पौर्णमास्यां महार्हेण शाल्यन्नेन महीयसा ॥५२॥
अभिषिच्य महादेवं पिण्डेश्वरमनन्यधीः ।
कृत्तिकायां चकाराऽथ महादीपोत्सवं विधिः ॥५३॥
पूजाञ्च महतीं कृत्वा पिण्डेशस्य महाप्रभोः ।
लब्ध्वा तस्य प्रसादं च जगाम स्वनिकेतनम् ॥५४॥

इसके बाद पुनः ब्रह्माजी आए और उन्होंने अति मनोहर कार्तिक महीने के पूर्णिमा के दिन शाली अन्न (बढ़ियाँ बासमती चावल) के पकवान्न आदि तयार कर अन्नकूट का भोग लगाकर, एकचित्त हो रुद्राभिषेक आदि से भगवान् अमृतपिण्ड पिण्डेश्वर शिव का अभिषेक कर, कृत्तिका नक्षत्र के दिन रात को लक्ष्यवर्ती आदि दीपमालिका जलाकर उत्सव और पूजा की। इस तरह से भगवान् पिण्डेश्वर का बृहत् पूजा कर, भगवान् पिण्डेश्वर से वर प्रसाद प्राप्त करके ब्रह्मा जी भी अपना निवास धाम ब्रह्मलोक चले गए।

ततः सर्वे सुरश्रेष्ठा महेन्द्रवरुणादयः ।
पिण्डेश्वरं समाराध्य तत्प्रसादेन भूयसा ॥५५॥
दिक्पालत्वं समासाद्य महाविभवसंयुताः ।
दैत्यदानवरक्षांसि विजित्य बहुशो रणे ॥५६॥
दिव्यस्थानं समासाद्य दिव्यभोगसमन्विताः ।
पूज्यमानाः सुरैः सर्वैः क्रीडन्ते विगतज्वराः ॥५७॥

इसके बाद, देवेन्द्र वरुण आदि सभी देवता भगवान् पिण्डेश्वर को दर्शन करने के लिए रुद्राक्षारण्य विजयपुर पधारे। भगवान् ब्रह्मा और भगवान् विष्णु के द्वारा जो उत्सव प्रारम्भ हुए थे, उन उत्सवों को देवताओं ने सुचालित करके बढ़ाया। भगवान् पिण्डेश्वर से वर प्रसाद प्राप्त कर महा विभव (संपत्ति) से युक्त हो दिक्पाल पदवियों को प्राप्त कर, रण में दैत्य, दानव, राक्षस सभी को जीत करके, दिव्य स्थान और अधिकार एवं भोगों को प्राप्त हो, सभी अन्य देवताओं के द्वारा पूजित होते हुए आज पर्यन्त निश्चिन्त स्वर्ग भोग कर रह रहे हैं।

ततः कदाचित् त्रिदशा इन्द्रोपेन्द्रानलादयः ।
शीतशैलेन्द्रमासाद्य पिण्डेश्वरनिकेतनम् ॥५८॥
प्रविष्टे मकरं भानावुत्तरायणपर्वणि ।
कृत्वा पूजां च महतीं महाविभवविस्तरम् ॥५९॥
धूपदीपोपहारैश्च गन्धपुष्पाक्षतादिभिः ।
महाविभवनैवेद्यैः पायसान्नपुरः-सरैः ॥६०॥
पूजयित्वा महादेवं पिण्डेश्वरमुमापतिम् ।
कृत्वा महोत्सवं शम्भोर्भक्तिभावसमन्विताः ॥६१॥

फिर किसी समय में इन्द्र विष्णु वरुण अग्नि आदि देवता शीतशैल रुद्राक्षारण्य विजयपुर में भगवान् अमृतपिण्ड पिण्डेश्वर का दर्शन करने के लिए पधारे। उत्तरायण में सूर्य मकर राशि में प्रवेश करते ही देवताओं ने भगवान् पिण्डेश्वर का एक वृहत् उत्सव किया। विधिपूर्वक अनेक वस्तुओं को जुटाकर धूप दीप उपहार पुष्प चन्दन अक्षता आदि से भगवान् की पूजा की। अनेक प्रकार के नैवेद्य निवेदित किए, पायसान्न विशेष का महाभोग लगाकर भक्ति भावनापूर्वक भगवान् पिण्डेश्वर उमापति शिव की अर्चना की।

ततश्च पुष्यनक्षत्रे पौर्णिमायां महातिथौ ।
शिवगङ्गाभिधे तीर्थे स्नापयित्वा महेश्वरम् ॥६२॥
स्नात्वा स्वयं ततः सर्वे प्रसन्नेन्द्रियमानसाः ।
पिण्डेश्वरं पूजयित्वा तत्प्रसादमवाप्य च ॥६३॥
स्वं स्वं स्थानमुपाजग्मुः प्रहर्षेण समन्विताः ।
ततः प्रभृति देवस्य मनुजा प्रतिवत्सरम् ॥६४॥

उस तरह से माघ महीना भर उक्त उत्सव को देवताओं ने किया। पुष्यनक्षत्र से युक्त पौष पूर्णिमा के दिन से मकर संक्रान्ति तक शिवगङ्गा तीर्थ में भगवान् पिण्डेश्वर को स्नान कराकर स्वयं भी स्नान करके प्रसन्न चित्त हो, पुनः भगवान् पिण्डेश्वर का पूजन करके, भगवान् पिण्डेश्वर से वर प्रसाद प्राप्त कर, अत्यन्त हर्षित देवगण अपने अपने स्थान को चले गए।

देवताओं के चले जाने के बाद उन उत्सवों को मानवों ने मनाना प्रारम्भ किया, प्रतिवत्सर उन उत्सवों को मानव आज भी मना रहे हैं।

मकरे मासि सम्प्राप्ते पौर्णिमायां महेशितुः।
पूजां कुर्वन्ति महतीं नाना विभवविस्तराम् ॥६५॥
पुष्यभे समनुप्राप्ते देवदेवं महेश्वरम्।
शिवगङ्गाभिधे तीर्थे स्नापयित्वा विधानतः ॥६६॥
पूजयित्वा महेशानं श्रद्धाभक्तिसमन्विताः।
स्वयं च शिवगङ्गायां स्नानं कुर्वन्ति भक्तितः ॥६७॥

हे देवी! हे ऋषीश्वरों! माघ महीना आने पर पौष पूर्णिमा से आरम्भ करके मनुष्य गण उस उत्सव को माघ पूर्णिमा तक मनाते हैं। भगवान् महेश्वर अमृतपिण्ड पिण्डेश्वर शिव की विधिपूर्वक विशेष पूजा करते हैं। पुष्य नक्षत्र युक्त पौर्णी पूर्णिमा के दिन भगवान् पिण्डेश्वर को शिवगङ्गा तीर्थ में स्नान कराकर स्वयं भी स्नान कर श्रद्धा भक्तिपूर्वक भगवान् पिण्डेश्वर की पूजा करते हैं। इस तरह से पूर्ण एक महीना (पौष पूर्णिमा से माघ पूर्णिमा) तक प्रतिवर्ष मनुष्यगण इस उत्सव को मनाते हैं।

प्राप्ते तु मकरे भानौ उत्तरायणपर्वणि।
पुष्यभे शिवगङ्गायां यः स्नायान् मनुजो भुवि ॥६८॥
तस्य पुण्यफलं वक्ष्ये शृणुष्वावहिता प्रिये!।

सूर्य मकर में आ जाने पर उत्तरायण पर्व में, पुष्य नक्षत्र में सूर्य आते ही प्रारम्भ कर जो मनुष्य पूरा एक महीना शिवगङ्गा तीर्थ में स्नान करता है, उस स्नान से उसे क्या पुण्यफल प्राप्त होता है? वह मैं सुनाता हूँ, हे प्रिये! तुम सावधान होकर सुनो।

प्रयागे मकरे मासि स्नानं कृत्वा निरन्तरम् ॥६९॥
यत्फलं समवाप्नोति तत्फलं लभते नरः।"
"कार्तिके मासि सम्प्राप्ते काश्यां विश्वेशसन्निधौ ॥७०॥

यः स्नायात् पञ्चगङ्गायां तस्य पुण्यफलं लभेत्" ।
"पुष्करे च महाक्षेत्रे कार्तिकं पञ्चवासरम् ॥७१॥
यः स्नाति मनुजो देवि ! श्रद्धाभक्तिसमन्वितः ।
यत्फलं लभते जन्तुस्तत्फलं लभते पुमान्" ॥७२॥

माघ के महीने में गङ्गा यमुना सरस्वती संगम त्रिवेणी तीर्थराज प्रयाग में एक महीना तक निरन्तर स्नान करके मनुष्य जो फल प्राप्त करते हैं, वह फल मकर में सिर्फ एक ही दिन एक बार शिवगङ्गा में स्नान करके मानवगण प्राप्त करते हैं। और कार्तिक महीना भर पञ्चगङ्गा में स्नान कर काशी विश्वनाथ का दर्शन करने से जो फल मानव प्राप्त करते हैं, वह फल मात्र एक बार कार्तिक महीना में शिवगङ्गा तीर्थ में स्नान कर पिण्डेश्वर का दर्शन करने से प्राप्त करते हैं। एवं कार्तिक महीना के पाँच दिन तीर्थराज पुष्कर में स्नान करके मनुष्यगण जो पुण्यफल प्राप्त करते हैं, वह पुण्य का फल कार्तिक महीना में एक बार शिवगङ्गा तीर्थ में श्रद्धा भक्ति पूर्वक स्नान करके मनुष्य गण प्राप्त करते हैं।

कुरुक्षेत्रे महापुण्ये राहुग्रस्ते दिवाकरे ।
स्नात्वा यत् पुण्यमाप्नोति तत्पुण्यं लभते नरः ॥७३॥

सूर्यग्रहण के महापर्व में कुरुक्षेत्र में स्नान करके मनुष्यगण जो फल प्राप्त करते हैं, वह फल शिवगङ्गा तीर्थ में एक बार मात्र भी किसी दिन स्नान करके प्राप्त करते हैं।

तस्मादवश्यं मर्त्येन शिवगङ्गा - सरोवरे ।
मकरे पुष्यनक्षत्रे स्नातव्यं शुभमिच्छता ॥७४॥
एवं प्रभावः पिण्डेशो ब्रह्मादीनां वरप्रदः ।
द्रष्टव्यः पूजनीयश्च सेवनीयश्च मानवैः ॥७५॥
पूजितः सेवितो दृष्टः सर्वान् कामान् प्रयच्छति ।
विरक्तैः सेवितो नित्यं मुक्तिं तेषां प्रयच्छति ॥७६॥

अतः, हे देवी ! हे ऋषीश्वरों ! शिवगङ्गा के सरोवर में पौष संक्रांति एवं पौष पूर्णिमा से मकर संक्रान्ति एवं माघी पूर्णिमा तक एक महीना अथवा

एक दिन भी सभी मनुष्यों को स्नान करना उचित है, उनका मङ्गल होता है। भगवान् पिण्डेश्वर ब्रह्मादि देवताओं को भी वर प्रदान करते हैं, ऐसे प्रभावशाली भगवान् पिण्डेश्वर हैं, मनुष्यों के द्वारा दर्शनीय हैं, पूजनीय हैं, सेवनीय हैं। जो मनुष्य ब्रह्माण्डपिण्ड के प्रतीक, अमृतपिण्ड भगवान् पिण्डेश्वर शिव को रुद्राक्षारण्य में दर्शन करता है, पूजा करता है, सेवा करता है, वह मनुष्य अपनी सारी कामनाओं को प्राप्त करता है। यदि विरक्त जन भगवान् पिण्डेश्वर की ऐसी सेवा करते हैं तो उन्हें मुक्ति प्राप्त हो जाती है।

पिण्डेश्वर इति क्वाऽपि कदाचित् येन केन वा।
कीर्तितश्चेत् प्रसन्नः सन् स्वसायुज्यं ददाम्युमे! ॥७७॥

हे उमे! हे ऋषीश्वरों! 'हे पिण्डेश्वर!' मात्र एक बार कोई भी मनुष्य कदाचित् किसी प्रसङ्ग में कह देता है अथवा भगवान् पिण्डेश्वर को स्मरण करता है, भक्ति भावना पूर्वक पुकारता है तो उसे प्रसन्न होकर मैं स्वसायुज्य (शिवसायुज्य) मुक्ति देता हूँ।

पिण्डेश्वरं कीर्तयतां नास्ति क्वापि पराभवः।
पिण्डेश्वरसमो देवो नास्ति लोकत्रये प्रिये! ॥७८॥

भगवान् पिण्डेश्वर का भजन कीर्तन स्मरण करने वाला व्यक्ति कहीं भी पराभव नहीं होता है, सर्वत्र विजय प्राप्त करता है। हे प्रिये! भगवान् पिण्डेश्वर के समान प्रभावशाली एवं दानी तीनों लोक में कोई देवता नहीं हैं।

रुद्राक्षारण्यसदृशं नास्ति क्षेत्रं धरातले।
इति ते कथितं देवि! शम्भोस्त्रिपुरवैरिणः ॥७९॥
पिण्डेश्वरस्य देवस्य माहात्म्यं परमाद्भुतम्।
शृण्वतां सर्वपापघ्नं सर्वकामफलप्रदम् ॥८०॥

हे देवी! इस पृथ्वीतल में रुद्राक्षारण्य के समान पुण्यदायक पवित्र क्षेत्र अन्यत्र और कोई नहीं है। यहाँ तक मैंने तुमको त्रिपुरहन्ता शिव पिण्डेश्वर का चरित्र सुनाया।

भगवान् पिण्डेश्वर शिव का माहात्म्य अति अद्भुत है, आश्चर्यजनक है। सुनने मात्र से भी संपूर्ण पापों को नष्ट करता है, सम्पूर्ण कामनाओं को प्रदान करता है।

यस्मै कस्मै न वक्तव्यं गोपनीयं प्रयत्नतः।
शिवभक्ताय दातव्यं शिवपूजापराय च ॥८१॥
इति ते सर्वमाख्यातं यत्पृष्टोऽहं त्वया प्रिये!।
पिण्डेश्वरस्य माहात्म्यं, किं भूयः श्रोतुमिच्छसि ?॥८२॥

हे देवी ! इस रुद्राक्षारण्य माहात्म्य को अति गोपनीय (सम्यक् रक्षा-गुपु-रक्षणे) रखना, कहीं कीड़े मकोड़े न लग जायँ, पानी न पड़े, न जल जाय। शिव (कल्याण) के भक्तों को, (शिवपूजा में संलग्न जनों को) देना, सुनाना, लिखके देना।

हे प्रिये ! हे पार्वती ! तुमने जो पूछा था, जो तुम्हारा प्रश्न था, उसके उत्तर में मैंने तुमको रुद्राक्षारण्य के प्रमुख देवता, ब्रह्माण्डपिण्ड के प्रतीक, अमृतपिण्ड भगवान् पिण्डेश्वर शिवका माहात्म्य सुनाया। अब तुम क्या सुनना चाहती हो, बताओ ? मैं सुनाऊँगा।

इति श्रीस्कन्दपुराणे हिमाद्रिखण्डे पूर्वभागे
रुद्राक्षारण्यमाहात्म्ये लक्ष्मीललितटीकायां
पिण्डेश्वरमाहात्म्यवर्णनं नाम षोडशोऽध्यायः ॥१६॥

अथ सप्तदशोऽध्यायः

देव्युवाच

देवदेव ! जगन्नाथ ! सच्चिदानन्दविग्रह !।
त्वत्तः श्रुतं मया सर्वं रुद्राक्षोत्पत्तिकारणम् ॥१॥
तथा पिण्डेश्वरोत्पत्तिस्त्वत्त एव श्रुता मया।
पिण्डेश्वरस्य माहात्म्यं विस्तरेण त्वयोदितम् ॥२॥

सावधानेन मनसा मया श्रुतमशेषतः।
